11

# धातुरूपाणि

संस्कृतभाषायां क्रियार्थं धातुरूपाणां प्रयोग: भवति। धातुरूपेषु पञ्चलकाराणां मुख्यत: प्रयोग: भवति। यथा —

**लट्लकार:**

**(वर्तमानकाले)**



**जन: चलदूरभाषे चित्राणि पश्यति।**

**लङ्लकार:**

**(भूतकाले)**



**ह्य: त्वं कुत्र आसी:?**

**लृट्लकार:**

**(भविष्यत्काले)**



**श्व: आवाम् आपणं चलिष्याव:।**

**लोट्लकार:**

**(आज्ञार्थे)**



**अत्र मा तिष्ठ।**

## विधिलिङ्लकार

**(संभावनार्थे)**



**संभवतः अद्य वर्षा भवेत्।**

प्रत्येकं लकारे त्रयः पुरुषाः त्रीणि वचनानि च भवन्ति। अधुना वयं लट्लकारस्य माध्यमेन कर्तृ-क्रिया-अन्वितिं प्रदर्शयन्तीम् इमाम् तालिकाम् अवगच्छामः-

**लट्लकारः (पठ् धातु)**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमः पुरुषः** | पठति | पठतः | पठन्ति |
| **(कर्तृपदम्)** | (सः,सा,तत्) | (तौ,ते,ते) | (ते,ताः,तानि) |
| **मध्यमः पुरुषः** | पठसि | पठथः | पठथ |
| **(कर्तृपदम्)** | (त्वम्) | (युवाम्) | (यूयम्) |
| **उत्तमः पुरुषः** | पठामि | पठावः | पठामः |
| **(कर्तृपदम्)** | (अहम्) | (आवाम्) | (वयम्) |

एवमेव सर्वेषु धातुषु सर्वेषु लकारेषु च क्रियायाः (धातुरूपाणां) प्रयोगः भवति।

**1. कोष्ठके प्रदत्त-धातूनाम् उचितैः रूपैः रिक्तस्थानानि पूरयत —**

i. ये छात्राः कक्षायां ध्यानेन पाठं .................... (श्रु, लट्), ते अभीष्टं परिणामं .................... (लभ्, लट्)।

ii. भो छात्राः! जंक इति भोज्यवस्तूनि तु कदापि मा .................... (भक्ष्, लोट्)

iii. अनुशासनबद्धः बालः यथाकालं सर्वं कार्यं कर्तुं ....................। (शक्, लट्)

iv. पुत्र! .................... (दृश्, लोट्) स्वलेखम्। त्वं ध्यानेन सुलेखं ....................। (लिख्, लोट्)



© NCERT not to be republished

Reprint 2025-26

v. पितः! अद्याहम् ध्यानेन लिखित्वा भवते ..................................। (दृश्, लृट्)

vi. रमा आश्रमे पुष्पाणि ..................................। (चि, लट्)

vii. यदि अहम् तत् कार्यं कुर्याम् तर्हि कमुपहारं ..................................? (लभ्, लृट्)

viii. ये जनाः यत्किमपि अखाद्यम् .................................. (भक्ष्, लट्) ते प्रायः अस्वस्थाः .............................. (भू, लट्)

ix. भो बालाः! कमपि प्राणिनं मा .................................. (तुद्, लोट्)

x. भवान् किं सत्यं .................................. (ब्रू, लट्)

**2. रेलदुर्घटनायाः विषये प्रकाशितेऽस्मिन् समाचारपत्रे धातुरूपाणाम् अशुद्धयः सञ्जाताः। एतत् समाचारपत्रं पठित्वा क्रियापदानि शुद्धानि कुरुत–**

**यथा –**

**ह्यः अहम् समाचार-पत्रे <u>पठामि</u> अपठम् यत् रेलदुर्घटनायाम् अनेके जनाः आहताः।**

i. केचन जनाः तान् असेवन् परम् दुःखस्य ..................................

ii. विषयः एषः सन्ति यत् केचित् दुर्जनाः तेषां ..................................

iii. धनस्यूतम् अचोरयः येन अनेकेषां तु ..................................

iv. परिचयपत्रमपि न अमिलत्। इतोऽपि ..................................

v. अधिकं यत् तेषां दुःखेन संवेदनहीनाः ..................................

vi. जनाः तु केवलं स्वचलदूरभाषयन्त्रेण तस्याः ..................................

vii. घटनायाः वीडियो-निर्माणे संलग्नाः सन्ति। ..................................

**3. उचित-धातुरूपेण रिक्तस्थानानि पूरयत —**

i. न कोऽपि जानाति श्वः किम् .................................. ? (भू)

ii. ह्यः त्वम् आपणात् किं .................................. (क्री)

iii. आगामिवर्षे अहम् विदेशम् ..................................। (गम्)

iv. अधुना त्वं किं ..................................। (पच्)

v. गतदिवसे अहम् एतत् पुस्तकम् ..................................। (इष्)

vi. परश्वः अहम् तव गृहे ..................................। (स्था)



Reprint 2025-26

© NCERT not to be republished

**4. प्रदत्तैः पदैः वाक्यानि रचयत–**

i. सिञ्चति ..........................................

ii. पठेयुः ..........................................

iii. कथयानि ..........................................

iv. पिबाव ..........................................

v. सेवामहे ..........................................

vi. आसन् ..........................................

vii. लेखिष्यसि ..........................................

viii. अपश्यः ..........................................

ix. लभन्ते ..........................................

x. अस्ति ..........................................

© NCERT not to be republished



Reprint 2025-26